DIAMOND MOUNTAIN DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 2

# WEEK THREE

DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Winter Term, Class Schedule

**WEEK THREE: Tuesday, Feb. 15, 2007 1:00 – 4:00 PM**

A. Quiz covering future system
B. Review of homework from class 2
C. Overview of causative conjugation (Whitney, #1041-1052)
D. Introduction to Arya Nagarjuna's मूलमध्यमककारिका, chapters 11 and 12

**HOMEWORK FOR WEEK THREE:**

1. Review the causative conjugation in Whitney ((Whitney, #1041-1052)

2. For each of the verses below from Arya Nagarjuna's मूलमध्यमककारिका, provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ ).

## पूर्वापरकोटिपरीक्षा नामैकादशमं प्रकरणं

पूर्वा प्रज्ञायते कोटिर्नेत्युवाच महामुनिः।
संसारो ऽनवराग्रो हि नास्यादिर्नापि पश्चिमं ॥ १

नैवाग्रं नावरं यस्य तस्य मध्यं कुतो भवेत्।

तस्मान्नात्रोपपद्यन्ते पूर्वापरसहक्रमाः॥ २

पूर्वम् जातिर्यदि भवेज्जरामरणमुत्तरं।

निर्जरामरणा जातिर्भवेज्जायेत चामृतः ॥ ३

पश्चाज्जातिर्यदि भवेज्जरामरणमादितः।

अहेतुकमजातस्य स्याज्जरामरणं कथं॥ ४

न जरामरणेनैव जातिश्च सह युज्यते।

म्रियेत जायमानश्च स्याच्चाहेतुकतोभयोः॥ ५

यत्र न प्रभवन्त्येते पूर्वापरसहक्रमाः।

प्रपञ्चयन्ति तां जातिं तज्जरामरणं च किं॥ ६

कार्यं च कारणं चैव लक्ष्यं लक्षणमेव च।

वेदना वेदकश्चैव सन्त्यर्था ये च के चन॥ ७

पूर्वा न विद्यते कोटिः संसारस्य न केवलं।
सर्वेषामपि भावानां पूर्वा कोटी न विद्यते॥ ८

## दुःखपरीक्षा नाम द्वादशमं प्रकरणं

स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकं।
दुःखमित्येक इच्चन्ति तच्च कार्यं न युज्यते॥ १

स्वयं कृतं यदि भवेत्प्रतीत्य न ततो भवेत्।
स्कन्धानिमानमी स्कन्धाः संभवन्ति प्रतीत्य हि॥ २

यद्यमीभ्य इमे ऽन्ये स्युरेभ्यो वामी परे यदि।
भवेत्परकृतं दुःखं परैरेभिरमी कृताः॥ ३

स्वपुद्गलकृतं दुःखं यदि दुःखं पुनर्विना।
स्वपुद्गलः स कतमो येन दुःखं स्वयं कृतं॥ ४

परपुद्गलजं दुःखं यदि यस्मै प्रदीयते।

परेण कृत्वा तद्दुःखं स दुःखेन विना कुतः॥ ५

परपुद्गलजं दुःखं यदि कः परपुद्गलः।

विना दुःखेन यः कृत्वा परस्मै प्रहिणोति तत्॥ ६

स्वयं कृतस्याप्रसिद्धेर्दुःखं परकृतं कुतः।

परो हि दुःखं यत्कुर्यात्तत्तस्य स्यात्स्वयं कृतं॥ ७

न तावत्स्वकृतं दुःखं न हि तेनैव तत्कृतं।

परो नात्मकृतश्चेत्स्याद्दुःखं परकृतं कथं॥ ८

स्यादुभाभ्यां कृतं दुःखं स्यादेकैककृतं यदि।

पराकारास्वयंकारं दुःखमहेतुकं कुतः॥ ९

न केवलं हि दुःखस्य चातुर्विध्यं च विद्यते।

बाह्यानामपि भावानां चातुर्विध्यं न विद्यते॥ १०